# નિર્વાણષટ્કમ

## Nirvana Shatkam

---

નિર્વાણ ષટ્કમ

મનોબુદ્ધ્યહઙ્કારચિત્તાનિ નાહં ન ચ શ્રોત્રજિહ્વે ન ચ ઘ્રાણનેત્રે |
ન ચ વ્યોમ ભૂમિર્ન તેજો ન વાયુશ્ચિદાનન્દરૂપઃ શિવોઽહં શિવોઽહમ ||૧||

ન ચ પ્રાણસંજ્ઞો ન વૈ પઞ્ચવાયુર્ન વા સપ્તધાતુર્ન વા પઞ્ચકોશાઃ |
ન વાક્પાણિપાદં ન ચોપસ્થપાયૂ ચિદાનન્દરૂપઃ શિવોઽહં શિવોઽહમ ||૨||

ન મે દ્વેષરાગૌ ન મે લોભમોહૌ મદો નૈવ મે નૈવ માત્સર્યભાવઃ |
ન ધર્મો ન ચાર્થો ન કામો ન મોક્ષશ્ચિદાનન્દરૂપઃ શિવોઽહં શિવોઽહમ ||૩||

ન પુણ્યં ન પાપં ન સૌખ્યં ન દુઃખં ન મન્ત્રો ન તીર્થં ન વેદા ન યજ્ઞાઃ |
અહં ભોજનં નૈવ ભોજ્યં ન ભોક્તા ચિદાનન્દરૂપઃ શિવોઽહં શિવોઽહમ ||૪||

ન મૃત્યુર્ન શઙ્કા ન મે જાતિભેદઃ પિતા નૈવ મે નૈવ માતા ન જન્મ |
ન બન્ધુર્ન મિત્રં ગુરુર્નૈવ શિષ્યશ્ચિદાનન્દરૂપઃ શિવોઽહં શિવોઽહમ ||૫||

અહં નિર્વિકલ્પો નિરાકારરૂપો વિભુત્વાચ્ચ સર્વત્ર સર્વેન્દ્રિયાણામ |
ન ચાસઙ્ગતં નૈવ મુક્તિર્ન મેયશ્ચિદાનન્દરૂપઃ શિવોઽહં શિવોઽહમ ||૬||

ઇતિ શ્રીમચ્છઙ્કરાચાર્યવિરચિતં નિર્વાણષટ્કં સંપૂર્ણમ ||

**www.shaivam.org**

---